# dashashlokI stuti

# દશશ્લોકીસ્તુતી સામ્બસ્તુતિઃ અથવા સામ્બદશકમ્

## Document Information

Text title : dashashlokI stuti

File name : dashashlokIstuti.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Sridhar Seshagiri s_seshagiri at yahoo.com

Proofread by : Sridhar Seshagiri s_seshagiri at yahoo.com

Latest update : December 23, 2007

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2019

*sanskritdocuments.org*

# દશશ્લોકીસ્તુતી સામ્બસ્તુતિઃ અથવા સામ્બદશકમ્

શિવોત્કર્ષદશશ્લોકીસ્તુતિઃ

સામ્બો નઃ કુલદૈવતં પશુપતે સામ્બ ત્વદીયા વયં
 સામ્બં સ્તૌમિ સુરાસુરોરગગણાઃ સામ્બેન સંતારિતાઃ ।
સામ્બાયાસ્તુ નમો મયા વિરચિતં સામ્બાત્પરં નો ભજે
 સામ્બસ્યાનુચરોઽસ્મ્યહં મમ રતિઃ સામ્બે પરબ્રહ્મણિ ॥ ૧॥

વિષ્ણ્વાદ્યાશ્ચ પુરત્રયં સુરગણા જેતું ન શક્તાઃ સ્વયં
 યં શંભું ભગવન્વયં તુ પશવોઽસ્માકં ત્વમેવેશ્વરઃ ।
સ્વસ્વસ્થાનનિયોજિતાઃ સુમનસઃ સ્વસ્થા બભૂવુસ્તત-
 સ્તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૨॥

ક્ષોણી યસ્ય રથો રથાઙ્ગયુગલં ચન્દ્રાર્કબિમ્બદ્વયં
 કોદણ્ડઃ કનકાચલો હરિરભૂદ્બાણો વિધિઃ સારથિઃ ।
તૂણીરો જલધિર્હયાઃ શ્રુતિચયો મૌર્વી ભુજઙ્ગાધિપ-
 સ્તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૩॥

યેનાપાદિતમઙ્ગજાઙ્ગભસિતં દિવ્યાઙ્ગરાગૈઃ સમં
 યેન સ્વીકૃતમબ્જસંભવશિરઃ સૌવર્ણપાત્રૈઃ સમમ્ ।
યેનાઙ્ગીકૃતમચ્યુતસ્ય નયનં પૂજારવિન્દૈઃ સમં
 તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૪॥

ગોવિન્દાદધિકં ન દૈવતમિતિ પ્રોચ્ચાર્ય હસ્તાવુભા-
 વુદ્ધૃત્યાથ શિવસ્ય સંનિધિગતો વ્યાસો મુનીનાં વરઃ ।
યસ્ય સ્તમ્ભિતપાણિરાનતિકૃતા નન્દીશ્વરેણાભવ-
 ત્તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૫॥

આકાશશ્ચિકુરાયતે દશદિશાભોગો દુકૂલાયતે
 શીતાંશુઃ પ્રસવાયતે સ્થિરતરાનન્દઃ સ્વરૂપાયતે ।
વેદાન્તો નિલયાયતે સુવિનયો યસ્ય સ્વભાવાયતે

તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૬॥

વિષ્ણુર્યસ્ય સહસ્રનામનિયમાદમ્ભોરુહાણ્યર્ચય-
ન્નેકોનોપચિતેષુ નેત્રકમલં નૈજં પદાબ્જદ્વયે ।
સમ્પૂજ્યાસુરસંહતિં વિદલયંસ્ત્રૈલોક્યપાલોઽભવ- var નાથો.અભવ
ત્તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૭॥

શૌરિં સત્યગિરં વરાહવપુષં પાદામ્બુજાદર્શને
ચક્રે યો દયયા સમસ્તજગતાં નાથં શિરોદર્શને ।
મિથ્યાવાચમપૂજ્યમેવ સતતં હંસસ્વરૂપં વિધિં
તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૮॥

યસ્યાસન્ધરણીજલાગ્નિપવનવ્યોમાર્કચન્દ્રાદયો
વિખ્યાતાસ્તનવોઽષ્ટધા પરિણતા નાન્યત્તતો વર્તતે ।
ઓંકારાર્થવિવેચની શ્રુતિરિયં ચાચષ્ટ તુર્યં શિવં
તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૯॥

વિષ્ણુબ્રહ્મસુરાધિપપ્રભૃતયઃ સર્વેઽપિ દેવા યદા
સંભૂતાજ્જલધેર્વિષાત્પરિભવં પ્રાપ્તાસ્તદા સત્વરમ્ । var પ્રાપ્તા યમેત્યેશ્વરમ્
તાનાર્તાઞ્શરણાગતાનિતિ સુરાન્યોઽરક્ષદર્ધક્ષણા-
ત્તસ્મિન્મે હૃદયં સુખેન રમતાં સામ્બે પરબ્રહ્મણિ ॥ ૧૦॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય શ્રીમચ્છઙ્કરભગવત્પાદકૃતૌ
દશશ્લોકીસ્તુતિઃ સમ્પૂર્ણા ॥

Encoded and proofread by Sridhar Seshagiri s underscore seshagiri@yahoo.com

*dashashlokI stuti*

pdf was typeset on December 26, 2019

Please send corrections to *sanskrit@cheerful.com*